विवद्धमार्गे शुक्रन्तु दृष्ट्वा दद्याद्विरेचनम् ।
गर्भे शुष्के तु वातेन बालानाञ्चापि शुष्यताम् ।
सितामधुककाश्मर्य्यैर्हितमुत्थापने पयः ॥"
इति वैद्यकचक्रपाणिसंग्रहे वातव्याध्यधिकारः ॥)

वातकः, पुं, ( वात इव चञ्चलः । इवार्थे कन् । यद्वा, वातं करोतीति । कृ + अन्येभ्योऽपीति डः । ) अश्मपर्णी । इत्यमरः । २ । ४ ।१४९ ॥

वातकर्म्म [ न् ], ( वातस्य कर्म्म । ) मरुत्क्रिया । पर्द्दनम् । यथा,—

वराह उवाच ।
"शृण्वमानेन मे भूमे ! वातकर्म्म प्रसृष्यति ।
एवं हि पुरुषो युक्तो वातपीड़ितमानसः ॥
मक्षिका पञ्च वर्षाणि त्रीणि वर्षाणि मूषकः ।
श्वा चैव त्रीणि वर्षाणि कूर्म्मो वै जायते नव ॥
एतद्वै तापनं देवि ! मेहनं मम शंसति ।
यो वै शास्त्रं विजानाति मम कर्म्मपरायणः ॥
श्रुत्वा वाक्यं भगवतो प्रत्युवाच वसुन्धरा ॥
धरण्युवाच ।
अतुलं लभते पापं तव कर्म्मपरायणः ।
तस्य देव सुखार्थाय विशुद्धिं वक्तुमर्हसि ॥
वराह उवाच ।
एतस्य वातं स्रोत्रेण मे देवि ! कथ्यमानं मयानघे ।
अपराधमिमं कृत्वा सन्तरेद्येन कर्म्मणा ॥
यावकेन दिनान्येकं त्रीणि सक्तेन च पुनस्त्रयः ।
कर्म्म चैवं ततः कृत्वा स च मे नापराध्यति ॥
सर्व्वसङ्गं परित्यज्य मम लोकाय गच्छति ।
एतत्ते कथितं भद्रे मरुत्कर्म्मापराधिनः ॥
दोषश्चैव गुणश्चैव यत्त्वया परिपृच्छितम् ॥"
इति वराहपुराणे मरुत्कर्म्मप्रायश्चित्तम् ॥

वातकी, [न्] त्रि, ( वातोऽतिशयितोऽस्त्यस्येति । वात + "वातातीसाराभ्यां कुक् च ।" ५।२।१२९। इति इनिः । कुक् च । ) वातरोगयुक्तः । तत्पर्य्यायः । वातरोगी २ । इत्यमरः ।३।१।५६॥

वातकुम्भः, पुं, (वातस्य कुम्भ इव ।) गजकुम्भाधोभागः । इति हेमचन्द्रः । ४ । २९३ ॥

वातकेतुः, पुं, ( वातस्य केतुरिव । ) धूलिः । इति त्रिकाण्डशेषः ॥

वातकेलिः, पुं, ( वात तु क सुखे + भावे घञ् । वातेन सुखेन केलिर्यत्र ।) कलालापः । विड्गदन्तक्षतः । इति मेदिनी । ले, १९३ ॥

वातगामी, [न्] पुं, ( वातेन वायुना सह गच्छतीति । गम + णिनिः ।) पक्षी । इति केचित् ॥

वातगुल्मः, पुं, वातुलः । यथा,—
"वातुलो वातगुल्मः स्यात्कारवायुर्निदाघजः ।
भञ्झानिलः प्रावृषिजो वासन्तो मलयानिलः ॥"
इति त्रिकाण्डशेषः ॥
( वातेन जातो गुल्मः ।) रोगविशेषः । (यथा, मार्कण्डेये । ३९ । ५४ ।
"वातगुल्मप्रशान्त्यर्थमुदावर्त्ते तथोदरे ।
यवागूं वापि पवनं वायुग्रन्थिं प्रतिक्षिपेत् ॥"
अस्य चिकित्सा यथा,—
"वचायवानीत्रिकटुदशमूलीजकं शृतम् ।
क्षायश्चोष्णो हितः पाने धान्यनागरकोऽथवा ॥
वातगुल्मेषु सर्व्वेषु ज्वरेषु विषमेषु च ।
रास्नाद्यपञ्चकं वापि वातगुल्मस्य पाचनम् ।
शठी सौवर्च्चलं शुण्ठी पाचनं वातगुल्मिने ॥"
"नागरं क्रिमिजित् पथ्या त्रिवृता त्रिगुणायुतम् ।
चूर्णं गुड़ान्वितं देयं वातगुल्मविरेचनम् ॥
दन्त्याश्च भाग एकस्तु द्वौ भागौ च हरीतकी ।
त्रिवृतायास्त्रिभागः स्यात् शुण्ठ्याश्चत्वार एव च ।
प्रक्षिप्य सर्व्वमेकत्र सर्व्वतुल्यागुड़ेन तु ॥
वटकं भक्षयेत् प्रातस्तस्योपरि जलं पिबेत् ।
क्वथितस्य विवेकश्च वातगुल्मोपशान्तये ॥"
इति वातगुल्मचिकित्सा । इति हारीते चिकित्सितस्थाने चतुर्थेऽध्याये ।) तस्य निदानादिर्गुल्मशब्दे द्रष्टव्यः ॥

वातघ्नी, स्त्री, ( वातं हन्तीति । हन + टक् । ङीप् । ) शालपर्णी । अश्वगन्धा । शिम्बड़ीक्षुपः । इति राजनिर्घण्टः ॥

वाततूलं, क्ली, ( वातेन उड्डीयमानं तूलम् । ) आकाशोड्डीयमानसूत्रम् । बुढ़िर सूता इति भाषा । तत्पर्य्यायः । इन्द्रसूत्रकम् २ इन्द्रतूलम् ३ ग्रीष्मह्रासम् ४ वंशकफम् ५ मरुद्ध्वजम् ६ । इति हारावली । २३ ॥

वातध्वजः, पुं, ( वातो वायुर्ध्वजो यस्य । ) मेघः । इति शब्दमाला ॥

वातपित्तजशूलं, क्ली, ( वातपित्ताभ्यां जायते इति । जन् + डः । तच्च तत् शूलञ्चेति ।) शूलरोगविशेषः । तस्य औषधं यथा,—
"मातुलुङ्गस्य निर्य्यासं गुड़ाज्येन समन्वितम् ।
वातपित्तजशूलानि हन्ति वै पानयोगतः ॥"
इति गारुड़े १८८ अध्यायः ॥
(तथास्यापि चिकित्सा । यथा,—
"दुरालभा पर्पटकश्च निम्बा
पटोलतिक्ताबृहतीत्रिफलीकम् ।
शम्बरकं क्वाथमिदं प्रयोज्यं
सपित्तवातोद्भवशूलशान्त्यै ॥"
इति हारीते चिकित्सितस्थानेऽष्टमेऽध्याये ।)

वातपुत्त्रः, पुं, ( वातस्य पुत्त्रः । ) भीमसेनः । हनूमान् । महाधूर्त्तः । इति मेदिनी । रे, ८६ ॥

वातपोथः, पुं, ( वातं वातरोगं पुष्णाति हिनस्तीति । पुथ + अण् । ) पलाशवृक्षः । इत्यमरः । २ । ४ । २९ ॥ (अस्य पर्य्यायो यथा,—
"वातपोथः पलाशः स्याद्दानप्रस्थश्च किंशुकः ।
राजादनो ब्रह्मवृक्षो यज्ञिकश्चो दलोऽपरः ॥"
इति वैद्यकरत्नमालायाम् ॥)

वातप्रमीः, पुं, स्त्री, ( वातं प्रमिमीते वाताभिमुखं गच्छतीति । वात + प्र + मा माने + "वातप्रमीः ।" उणा० ४ । १ । इति ईप्रत्ययेन साधुः । ) वातमृगः । इत्यमरः । २ । ५ । ७ ॥ वाशोट् हरिण इति भाषा ॥ नकुलः । अश्वः । इति संक्षिप्तसारोणादिवृत्तिः ॥ ( वायुवद्वेगगामिनि, त्रि । यथा, ऋग्वेदे । ४ । ५८ । ७ ।
"सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः ॥")

वातफुल्लान्त्रं, क्ली, ( वातेन फुल्लं विकशितं यदन्त्रं तत् । ) पुप्फुसः । इति भूरिप्रयोगः ॥

वातमजः, पुं, ( वातमभिमुखीकृत्य अजति गच्छतीति । वात + अज + "वातशुनीतिलशर्द्धेष्वजधेट्तुदजहातीनां उपसंख्यानम् ।" ३ । २ । २८ । इत्यस्य वार्त्तिकोक्त्या खश् । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३ । ६७ । इति मुम् । ) वातमृगः । इति जटाधरः ॥ ( वातगामिनि, त्रि । यथा, भट्टिः । २ । १७ ।
"मेघात्ययोपात्तवनोपशोभं
कदम्बकं वातमजं मृगाणाम् ॥")

वातमण्डली, स्त्री, ( वातस्य मण्डली । ) वात्या । इति त्रिकाण्डशेषः ॥

वातमृगः, पुं, ( वाताभिमुखगामी मृगः । ) वातप्रमीः । इत्यमरः । २ । ५ । ७ ॥

वातरक्तं, क्ली, ( वातदूषितं रक्तं यत्र । ) रोगविशेषः । तस्य विप्रकृष्टं निदानमाह ।
"लवणाम्लकटुक्षारस्निग्धोष्णाजीर्णभोजनैः ।
क्लिन्नशुष्काम्बुजानूपमांसपिण्याकमूलकैः ॥
कुलत्थमाषनिष्पावशाकादिपललेक्षुभिः ।
दध्यारनालसौवीरशुक्ततक्रसुरासवैः ॥
विरुद्धाध्यशनक्रोधदिवास्वप्नातिजागरैः ।
प्रायशः सुकुमाराणां मिथ्याहारविहारिणाम् ।
स्थूलानां सुखिनां चापि प्रकुप्येद्वातशोणितम् ॥
हस्त्यश्वोष्ट्रैर्गच्छतश्चाश्नतश्च
विदाह्यन्नं सविदाहाशनस्य ॥"
क्षारो यवक्षारादिः । अजीर्णभोजनैः अजीर्णाय भोजनैः । अतिमात्रभोजनैरित्यर्थः । क्लिन्नादीनि मांसस्य विशेषणानि । क्लिन्नं शटितम् । शुष्कमातपे शोषितम् । अम्बुजं मत्स्यादिमांसम् । आनूपं गौड़ादिपूर्व्वदेशजं मांसम् । पिण्याकं तिलखलिः । मूलकं प्रसिद्धमेव । निष्पावः बोड़ाशाकम् । शाकं पत्रशाकम् । आदिशब्देन हस्ताकादीनि फलशाकानि गृह्यन्ते । पललं शटितत्वादिदोषरहितमपि मांसं वातशोणितं प्रकोपयेत् । शटितादि तु मांसं विशेषतो वातशोणितं प्रकोपयेत् । आरनालं सन्धानभेदः । शुक्तं सन्धानभेदः । सौवीरं सन्धानभेदः । तक्रं चतुर्थांशजलयुक्तं वस्त्रपूतं दधि । सुरा सन्धानभेदः । आसवः सन्धानभेदः । विरुद्धं क्षीरमत्स्यादि । अध्यशनम् । अजीर्णे भुज्यते यत्तु तदध्यशनमुच्यते । अतिजागरो निशि । प्रायशः बाहुल्येन । सुकुमाराणां अल्पतरकायव्यापाराणाम् । अथवा मिथ्याहारविहारिणाम् । अयथाहारविहाराभ्यां स्थूलानां सुखिनाञ्च रक्तदुष्टा । हस्त्यश्वोष्ट्रैर्गच्छतः यतो वायुर्विवर्द्धते रुधिरञ्चाधो गच्छति । हस्त्यादय उपलक्षणानि । पश्चा-